Public domain. Digitization Muthulakshmi Research Acader

ESS

श्रीमत्सर्वज्ञानोत्तरागमः

विद्यापादः

पदार्थप्रकरणम्

पशुपाशविधानं हि श्रोतुमिच्छामि तत्त्वतः ।
संयोगं च तथा तेषां कथयस्व महेश्वर ॥ १ ॥

आद्याः पाशास्ततस्तेषां जीव आद्यस्तु किं नु वै ।
के पाशाः को मलः प्रोक्तः कस्माद् बद्धः पुमानिति ॥ २ ॥

पतिश्च किंविधो ज्ञेयः साधिकारपदे स्थितः ।
शिवश्च कीदृशः प्रोक्तो योऽधिकारविवर्जितः ॥ ३ ॥

पशुरात्मा स्वतन्त्रश्च चिन्मात्रो मलदूषितः[१] ।
संमूढो नित्यसंसारी किंचिज्ज्ञो निश्चरो[२]ऽक्रियः ॥ ४ ॥

ताम्रस्येव तु हेमत्वमन्तर्लीनं यथा स्थितम् ।
अन्तर्लीनं तथा ज्ञेयं शिवत्वं पुद्गलस्य तु ॥ ५ ॥

रससि(क्तं)[३] यथा ताम्रं हेमत्वं प्रतिपद्यते ।
तथात्मा ज्ञानसंबन्धात् शिवत्वं प्रतिपद्यते ॥ ६ ॥

केनचित् साधनेनैव मुक्तः शिवसमो भवेत् ।
इत्येवं केचिदिच्छन्ति वादिनो मुनिपुङ्गवाः ॥ ७ ॥

n Public domain. Digitization Muthulakshmi Research Academy

वार्तामात्रमिदं प्रोक्तं सर्वथा न तदर्थवत्।
एकदेशेन वा जीवः किं वा सर्वात्मना समः ॥ ८ ॥

एकदेशेन चेत् सर्वे शिवाः संसारवर्तिनः।
एकदेशेन सर्वेषामस्ति साम्यं शिवेन हि ॥ ९ ॥

सर्वात्मना चेत् साम्येन सर्वथा शिव एव सः।
एकाकारस्य शून्यत्वाद् भेदाभावाच्च वस्तुनः ॥ १० ॥

तस्मात् जीवः स्वतः साक्षाच्छिवः सत्त्वादिलक्षणः।
यथा भेषजसंपर्कात् ताम्रस्य मलनाशनम् ॥ ११ ॥

तथा जीवस्य दुःखादिनिवृत्तिः केनचिद् भवेत्।
रससिक्तमयः स्वर्णं यथा भवति सर्वदा ॥ १२ ॥

केनचित् साधनेनैव तथा जीवः शिवो भवेत्।
इति केचित्तु मोहेन प्रवदन्ति च वादिनः ॥ १३ ॥

तन्न तत् प्रतिपन्नं हि स्वतःसिद्धं न पश्यति।
यथा स्वाभाविकं वह्नेरौष्ण्यं नैव विनश्यति ॥ १४ ॥

प्रकाशो वा तथास्यापि न दुःखादि विनश्यति।
मणिमन्त्रौषधादीनां शक्तिवैचित्र्यमात्रतः ॥ १५ ॥

नष्टवत् प्रतिबद्धत्वं न नष्टं संमतं हि तत्।
यथा ताम्रमलो नैव केनचित् प्रविनश्यति ॥ १६ ॥

Public domain. Digitization Muthulakshmi Research Academ

नष्टवत् प्रतिबद्धं हि विनष्टं मन्यते बुधाः।
जीवत्वं च तथास्यापि सुखदुःखादिलक्षणः॥ १७॥

नष्टवत् प्रतिबद्धं स्यान्नैव नश्यति केनचित्।
पयसा वेष्टितं तोयं पय इत्यभिमन्यते॥ १८॥

राजतं काञ्चनग्रस्तं हेम इत्यभिधीयते।
तथैव रसवीर्येण वह्निसंपर्कतोऽपि वा॥ १९॥

अयसो हेमवर्णत्वात् न हेमत्वं कदाचन।
रसवीर्यविनाशे तु वर्णस्तस्य विनश्यति॥ २०॥

साधनेन विना जीवो न शिवः सर्वथा भवेत्।
स्वतोऽशिवः शिवः साक्षान्न भवेत्तु कदाचन॥ २१॥

शिव एव स्वतः साक्षात् शिवो भवति नान्यथा।
महापापवतां नृणां परमाद्वैतवेदने॥ २२॥

प्रद्वेषो जायते सम्यग् वेदगम्ये शिवेऽपि च।
परमाद्वैतविज्ञानमिदं भवभयापहम्॥ २३॥

भवप्रसादतो लभ्यं भावनारहितं पदम्।
केचित् सामान्यमद्वैतं वदन्ति भ्रान्तचेतसः॥ २४॥

विशेषाद्वैतमाश्रित्य न तेषामस्ति वेदनम्।
द्वैतमेवास्ति सर्वत्र प्रवदन्ति हि केचन॥ २५॥

n Public domain. Digitization Muthulakshmi Research Academy

न ते मनुष्याः कीटाश्च पतङ्गाश्च घटा हि ते।
भेदे सति भवेदैक्यमिति चेत् तन्न संगतम्॥ २६॥

यथाज्ञात्वा विभागेन घृतं पयसि संस्थितम्।
तथात्मा पाशसंश्लिष्टो ह्यविभागेन संस्थितः॥ २७॥

विषापहारं कुरुते ध्यानबीजबलैर्यथा।
कुरुते पाशविश्लेषं तथाचार्यशिवाध्वरी॥ २८॥

मन्त्रौषधबलैर्यद्वत् संनिरोधो विषस्य तु।
तथा हि सर्वपाशानां संनिरोधस्तु दीक्षया॥ २९॥

दह्यते धाम्यमानानां साधूनां तु यथा मलम्।
तथाचार्यो दहेत् पुंसां वायुभूतो मलावुभौ॥ ३०॥

गुणभूताः स्मृताः पाशाः धर्माधर्मौ मलौ स्मृतौ।
सहजौ सर्वभूतानां ताम्रकालिमवत् स्थितौ॥ ३१॥

त्रिविधास्ते स्मृताः पाशाः सहजागन्तुकास्तथा।
सांसर्गिकास्तथा भूयः शृणु तेषु विनिर्णयम्॥ ३२॥

तन्मात्राद्यास्तु ये तत्त्वाः सुसूक्ष्माः सर्वगाः गुह।
ते तु पाशाः परा प्रोक्ताः सहजाः सर्वजन्तुषु॥ ३३॥

ततमेतैर्जगत् कृत्स्नं पाशाश्चैते मलात्मकाः।
सूक्ष्मगाः सर्वगाः नित्याः सहजाः सर्वजन्तुषु॥ ३४॥

Public domain. Digitization Muthulakshmi Research Acade

इन्द्रियाणि च भूतानि सर्वे सर्वाणि तैः सह।
आगन्तुकाः स्मृता ह्येते तस्मात् सांसर्गिकाः पुनः ॥ ३५ ॥

संसर्गाद् यद् भवेत् कर्म शुभं वा यदि वाशुभम्।
ते तु सांसर्गिकाः पाशाः सुखदुःखफलप्रदाः ॥ ३६ ॥

कर्मणा तु शरीराणि भावात् कर्मादयो भवेत्।
पूर्वोपार्जितकृत्यानां भावः संयोगकारकः ॥ ३७ ॥

ईश्वरो व्यञ्जकस्तेषां भवेत् कर्मानुरूपतः।
कर्मोदयाद् भवेत् सृष्टिरपास्तैः प्रलयं विदुः ॥ ३८ ॥

विषयासक्तिदोषेण गुणदोषाच्छिखिध्वज।
बन्धमाप्नोति पुरुषो ह्यकर्ता सर्वगोऽप्यसौ ॥ ३९ ॥

पिता पुत्रापराधेन यथैकस्थो निबध्यते।
अकर्तापीह पुरुषो तथा बन्धमवाप्नुयात् ॥ ४० ॥

यथैवासाधुसंयोगादुदासीनोऽपि मानवः।
तथा बन्धमवाप्नोति तथा ज्ञेयस्तु पुद्गलः ॥ ४१ ॥

अनादिनिधनाः पाशा जीवोऽनाद्यस्तु कीर्तितः।
तच्छेदकस्तथानादिः पशुपाशपतिस्तु सः ॥ ४२ ॥

पतिः सदाशिवो ज्ञेयो मन्त्रात्मा मन्त्रविग्रहः।
सर्वमन्त्राधिपश्चासौ सृष्टिसंहारकारकः ॥ ४३ ॥

n Public domain. Digitization Muthulakshmi Research Academy

पतिरेवं समाख्यातः सर्वकामफलप्रदः ।
स्थूलः सूक्ष्मो विमिश्रश्चेत्येवंरूपस्तु स स्मृतः ॥ ४४ ॥

शिवो यस्तु परस्तस्मात् मन्त्रातीतो निरञ्जनः ।
निरामयो निराधारो वर्णरूपविवर्जितः ॥ ४५ ॥

सर्वज्ञः सर्वगः शान्तः सर्वात्मा सर्वतोमुखः ।
अतीन्द्रियो निरालम्बः सुसूक्ष्मः शाश्वतो ध्रुवः ॥ ४६ ॥

स एव भगवान् व्यापी ह्यप्रमेयो ह्यनौपमः ।
बहिरन्तर्विभागेन तिले तैलमिव स्थितः ॥ ४७ ॥

इति श्रीमत्सर्वज्ञानोत्तरागमे विद्यापादे
पदार्थस्वरूपनिरूणं नाम
प्रथमं प्रकरणम्

द्वितीयं प्रकरणम्

शिवतत्त्वसाक्षात्कारनिरूपणम्

अथातः[५] संप्रवक्ष्यामि ह्युपायं तत्त्वतो गुह ।
अग्राह्यस्यापि सूक्ष्मस्य सर्वगस्य तु निष्कलम् ॥ ४८ ॥

येन विज्ञायते सम्यक् यं ज्ञात्वा तु शिवो भवेत् ।
गुरुं परं परायत्तमदृष्टं सर्ववादिभिः ॥ ४९ ॥

Public domain. Digitization Muthulakshmi Research Academ

भवबन्धविमोक्षार्थं परमं सर्वतोमुखम् ।
योऽसौ सर्वगतो देवः सर्वात्मा सर्वतोमुखः ॥ ५० ॥

सर्वतत्त्वमयोऽचिन्त्यः सर्वस्योपरि संस्थितः ।
सर्वतत्त्वव्यतीतश्च वाङ्मनोनामवर्जितः ॥ ५१ ॥

सोऽहमेवमुपासीत निर्विकल्पेन चेतसा ।
यदेव निष्कलं रूपं[६] शाश्वतं ध्रुवमव्ययम्[७] ॥ ५२ ॥

निर्विकल्पमनिर्देश्यं हेतुदृष्टान्तवर्जितम् ।
अलिङ्गमक्षरं शान्तं विषयातीतगोचरम् ॥ ५३ ॥

अविभाव्यमसन्देह्यं तदहं नात्र संशयः ।
सोऽहमेव परो देवः सर्वमन्त्रमयः शिवः ॥ ५४ ॥

सर्वमन्त्रव्यतीतश्च सृष्टिसंहारवर्जितः ।
मया व्याप्तमिदं सर्वं दृश्यादृश्यं चराचरम् ॥ ५५ ॥

अहमेव जगन्नाथो मत्तः सर्वं प्रवर्तते[८] ।
अनेकाकारसंभिन्नं शिवं भुवनसंचयम् ॥ ५६ ॥

शिवाद्यवनिपर्यन्तं तत्सर्वं मयि संस्थितम् ।
यच्च किंचित् जगत्यस्मिन् दृश्यते श्रूयतेऽपि च ॥ ५७ ॥

बहिरन्तर्विभागेन तत्सर्वं व्यापितं मया ।
अहमात्मा शिवो ह्यन्यः[९] परमात्मेति यः स्मृतः ॥ ५८ ॥

n Public domain. Digitization Muthulakshmi Research Academy

एवं योपासयेन्मोहान्न शिवत्वमवाप्नुयात् ।
शिवोऽन्यस्त्वहमेवान्यः पृथग्भावं विवर्जयेत् ।। ५९ ।।

यः शिवः सोऽहमेवेति ह्यद्वयं[10] भावयेत् सदा ।
अद्वैतभावनायुक्तः सर्वत्रात्मनि संस्थितः ।। ६० ।।

सर्वगं सर्वदेहस्थं पश्यते[11] नात्र संशयः ।
एवमेकात्मभावेन संस्थितस्य तु योगिनः ।। ६१ ।।

सर्वज्ञत्वं प्रवर्तेत विकल्परहितस्य तु ।
योऽसौ सर्वेषु शास्त्रेषु पठ्यते ह्यज ईश्वरः ।। ६२ ।।

अकायो निर्गुणो ह्यात्मा सोऽहमस्मि न संशयः ।
अविज्ञातः पशुः सो हि सृष्टिधर्मं समाश्रितः ।। ६३ ।।

विज्ञातः शाश्वतः शुद्धः स शिवो नात्र संशयः ।
तस्मादात्मा सदा वेद्यः सुविचार्यो विचक्षणैः ।। ६४ ।।

परापरविभागेन स्थूलसूक्ष्मविभागशः ।
परः परमनिर्वाणोऽपरः सृष्टिविभेदतः ।। ६५ ।।

स्थूलो मन्त्रमयः प्रोक्तः सूक्ष्मो ध्यानैकगोचरः ।
अथवा बहुनोक्तेन किमुक्तेन षडानन ।। ६६ ।।

वाग्विकल्पविशेषेण मनःसंमोहकारिणा ।
सर्वे धर्मात्मनः सन्ति यमेव परिकल्पयेत् ।। ६७ ।।

Public domain. Digitization Muthulakshmi Research Acader

tat sad bhavatyasaṃdehāt sोऽpi tadbhāvanāyutaḥ।
ityevamātmani jñānaṃ kathitaṃ tu samāsataḥ॥ ६८॥

jñātvātmānamidaṃ sarve hyātmānaṃ paryupāsate।
na tatra devānuddiśya yajñā vā bahudakṣiṇāḥ॥ ६९॥

ātmavijñānamāśritya vimalaṃ sarvatomukham्।
saṃsārārṇavamagnānāṃ prāṇināṃ[१२] śaraṇārthinām्॥ ७०॥

nānyaḥ śaraṇadaḥ kaścidātmajñānādṛte kvachit्।
ātmānaṃ paramo bhūtvā yo vijānāti tattvataḥ॥ ७१॥

sa mुchyate tvayatnena sarvāvasthāṃ gतोऽpi san्।
ātmalābhāt paro lābhaḥ kvachidanyo na vidyate॥ ७२॥

tadātmānamupāsīta yoऽyamātmā parastु saḥ।
na prāṇo naiva chāpāno viśiṣṭakaraṇastathā॥ ७३॥

sarvajñaṃ tु tadātmānaṃ[१३] paripūrṇaṃ sadā smरेत्।
na chaivābhyantare bāह्ये nātidūre samīpataḥ॥ ७४॥

suniṣkale pare sthāne tatra chittaṃ niveśayेत्।
tiryagūर्ध्वमधश्चैव bahirantaश्च nityaśaḥ॥ ७५॥

sarvaśūnyaṃ tamābhāsamātmānaṃ bhāvayेत् sadā।
sarvaśūnyaṃ na chāśūnyamātmānaṃ paryupāsते॥ ७६॥

n Public domain. Digitization Muthulakshmi Research Academy

नैव शून्यं न चाशून्यं न शून्यं शून्यमेव च।
पक्षपातविनिर्मुक्तमात्मानं पर्युपासयेत्॥ ७७॥

निरामयं निराधारं वर्णरूपविवर्जितम्।
निरञ्जनं गुणातीतमात्मानं पर्युपासयेत्॥ ७८॥

निराश्रयं निरालम्बमप्रमेयमनूपमम्[१४]।
स्वभावविमलं नित्यमात्मानं पर्युपासयेत्॥ ७९॥

संन्यस्य सर्वकर्माणि निस्पृहः सङ्गवर्जितः।
भावयेदात्मनात्मानमात्मन्येवात्मनि स्थितः॥ ८०॥

स्वदेशजातिसंबन्धान् वर्णाश्रमसमन्वितान्।
भावानेतान् परित्यज्य स्वरूपं भावयेद् बुधः॥ ८१॥

मन्त्रोऽयं देवता ह्येषा इदं ध्यानमिदं तपः।
सर्वभावान् परित्यज्य ह्यात्मभावं तु भावयेत्॥ ८२॥

अभावे भावमाश्रित्य भावं कृत्वा निराश्रयम्।
आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत्॥ ८३॥

नैव चिन्त्यं न चाचिन्त्यं न चिन्त्यं चिन्त्यमेव च।
पक्षपातविनिर्मुक्तमात्मानं पर्युपासयेत्॥ ८४॥

अचिन्त्यं चिन्तयेन्नित्यं कृत्वा चित्तं निराश्रयम्।
निस्तत्त्वे निष्कलीभूते विन्दत्यात्मनि यत् सुखम्॥ ८५॥

Public domain. Digitization Muthulakshmi Research Academ

निर्विकल्पमचिन्त्यं च हेतुदृष्टान्तवर्जितम्।
तत् सुखं परमं प्रोक्तमात्यन्तिकमनौपमम्॥ ८६॥

निरस्य विषयासक्तिं मनोवृत्तिं विहाय च।
यदा यात्युन्मनीभावं तदा तत् परमं सुखम्॥ ८७॥

सर्वदिग्देशकालेषु योगाभ्यासो विधीयते।
सर्ववर्णाश्रमाणां च ज्ञानभेदो न भिद्यते॥ ८८॥

गवामनेकवर्णानां क्षीरस्याप्येकवर्णता।
क्षीरवत् पश्यते ज्ञानं लिङ्गिनश्च गवां समाः॥ ८९॥

यस्मात् सर्वगतं ब्रह्म व्यापकं सर्वतोमुखम्।
तस्मात् ब्रह्मणि संस्थाप्य दिग्देशं न विचारयेत्॥ ९०॥

नैव तस्य कृतेनार्थो न कार्यो न विधिः स्मृतः।
न लिङ्गं नाश्रमाचारः परमात्मनि संस्थितः॥ ९१॥

गच्छंस्तिष्ठन् स्वपन् जाग्रन् भुञ्जानो वा पिबन्नपि।
सर्वदा सर्वकार्येषु वातशीतातपेषु च॥ ९२॥

भवदारिद्र्यरोगेषु मान्द्यविज्वरकादिषु।
आत्मन्येव स्थितः शान्त आत्मतृप्तस्तु निष्कलः॥ ९३॥

नागतोऽहं गतो वापि नागमिष्ये न गच्छता।
न भूतो न भविष्यामि प्रकृत्य स्थिरधर्मणि॥ ९४॥

n Public domain. Digitization Muthulakshmi Research Academy

प्राकृतानि हि कर्माणि प्रकृतिः कर्मसंभवः ।
नाहं किंचित् करोमीति युक्तं मन्येत तत्त्ववित् ।। ९५ ।।

नैव प्रकृतिसंबद्धो मुक्त इत्यभिधीयते ।
न चैव प्राकृतैर्दोषैर्लिप्यते तु कदाचन ।। ९६ ।।

विनाश्य तमसो रूपं दीपो यद्वत् प्रकाशते ।
आभात्येवं परो ह्यात्मा त्यक्त्वैवाज्ञानजं तमः ।। ९७ ।।

स्नेहक्षयाद् यथा दीपो बलान्निर्वाणमृच्छति ।
तथात्मभावनायुक्तः स्वात्मन्येवावतिष्ठति ।। ९८ ।।

घटसंवृत आकाशो नीयमाने यथा घटे ।
घटो नीयेत नाकाशः तद्वज्जीवो नभोपमः ।। ९९ ।।

छिन्ने कुम्भे यथाकाशः आकाशत्वं प्रपद्यते ।
विभिन्ने प्राकृते देहे तथात्मा परमात्मनि ।। १०० ।।

इत्येवमधिकारेणसर्वज्ञानाधिकारिणा ।
सर्वबन्धाद् विनिर्मुक्तःसर्वज्ञः सर्वगो[१५] भवेत् ।। १०१ ।।

तदागमान् संपरित्यज्य सर्वान्
शुद्धं गृहीत्वात्मसमाधियोगम् ।
अस्मात् परं नान्यदिहास्ति किंचित्
ज्ञात्वैव संत्यज्य मनोविकल्पम् ।। १०२ ।।

Public domain. Digitization Muthulakshmi Research Acader

विज्ञानमेवं समुपास्य विद्वान् विशत्यकायं सततं नियुक्तः।
स सर्वगामी भवतीह मुक्तः तद्धर्मधर्मी बहिरन्तरस्थः॥ १०३॥

सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः।
अनन्तशक्तिश्च निरामयात्मा विशुद्धदेहः स शिवत्वमेति॥ १०४॥

न दीक्षा न तु संस्कारो न मुद्रा न च मण्डलम्।
न जपो नार्चनं ध्यानं न होमो नैव साधनम्॥ १०५॥

धर्माधर्मफलं नास्ति नैव पिण्डोदकक्रिया।
नियमादि न तस्यास्ति नोपवासो विधीयते॥ १०६॥

प्रवृत्तिश्च निवृत्तिश्च ब्रह्मचर्यव्रतानि च।
अग्निप्रवेशनं नास्ति पतनं भृगुनोदके॥ १०७॥

शिवज्ञानामृतं पीत्वा विचरन् स्वयमेव हि।
शिववच्छाश्वतः सिद्धः सृष्टिधर्मविवर्जितः॥ १०८॥

सत्यं सत्यं पुनः सत्यं त्रिसत्यं शपथः कृतः।
अतः परतरं नास्ति विज्ञेयं कुत्रचिद् गुह॥ १०९॥

विमलयति सर्वभावान् विमलात्मा विमलबुद्धिमान्।
सर्वं विमलं पश्यति विमलो विमलेन भावेन॥ ११०॥

इति सर्वज्ञानोत्तरागमे विद्यापादे
शिवतत्त्वसाक्षात्कारनिरूपणं नाम द्वितीयं प्रकरणम्

n Public domain. Digitization Muthulakshmi Research Academy

तृतीयं प्रकरणम्

भूतात्मनिरूपणम्

विनाशोत्पत्तिरेवास्य तच्चाहारमयं विदुः।
कर्मणोऽप्यतिमिश्रेण यच्छरीरमिहात्मनः॥ १११॥

तद्भूतपरिणामेन विज्ञेयं हि चतुर्विधम्।
उद्भिदः स्थावराः ज्ञेयास्तृणगुल्मादिरूपिणः॥ ११२॥

कृमिकीटपतङ्गाद्याः स्वेदजा नाम देहिनः।
अण्डजाः पक्षिणः सर्वे नक्रमत्स्याहिकछपाः॥ ११३॥

जरायुजाश्च विज्ञेया मानुषा सचतुष्पदाः।
तत्र सिक्ता जलैर्भूमिरन्तरूष्मप्रपान्विताः॥ ११४॥

वायुना व्यूह्यमाना खे बीजत्वं (च) प्रपद्यते।
एकषष्ट्यादिबीजानि संसिक्तान्यम्बुना पुनः॥ ११५॥

उच्छ्रूनतां मृदुत्वं च मूलभावं व्रजन्ति च।
तन्मूलादङ्कुरोत्पत्तिरङ्कुरात् पर्णसंभवः॥ ११६॥

पर्णान्नालं ततः काण्डं काण्डाच्च प्रसवं पुनः।
प्रसवाच्च तुषः क्षीरं क्षीरात् तण्डुलसंभवः॥ ११७॥

तण्डुलाच्च यथा पक्वास्तथा चौषधयस्तदा।
यवाद्याः शालिपर्यन्ताः श्रेष्ठाः सप्तदश स्मृताः॥ ११८॥

Public domain. Digitization Muthulakshmi Research Acader

औषध्यः फलपाकान्ताः शेषाः क्षुद्राः प्रकीर्तिताः।
एता लूना मर्दिताश्च शनैरुद्भूय संस्कृताः॥ ११९॥

शूर्पोलूखलयन्त्राद्यैः स्थाल्यामुदकवह्निभिः।
षड्विधाहारभेदेन परिणामं व्रजन्ति ताः॥ १२०॥

अन्योन्यरससंयोगादनेकस्वादुतां गताः।
भक्ष्यं भोज्यं च पेयं च लेह्यं चोष्यं च पिच्छलम्॥ १२१॥

इति भेदाः षडन्नस्य मधुराद्याश्च षड्रसाः।
तदन्नं पिण्डकबलग्रासैर्भुक्तं च देहिभिः॥ १२२॥

अन्तःस्थमाशये पूर्वं प्राणः स्थापयते क्रमात्।
अविष्वक् स्थाप्य चाहारं स वायुः कुरुते द्विधा॥ १२३॥

संप्रविश्यान्नमध्ये तु पृथगन्नं पृथग् जलम्।
अग्नेरूर्ध्वं जलं स्थाप्य तदन्नं च जलोपरि॥ १२४॥

जलस्याधः स्वयं प्राणः स्थित्वाग्निं धमते शनैः।
वायुना धाम्यमानाऽग्निरत्युष्णं कुरुते जलम्॥ १२५॥

तदन्नमुष्णतोयेन समन्तात् पच्यते पुनः।
द्विधा भवति तत् पक्वं पृथक् किट्टं पृथग् रसः॥ १२६॥

आहारस्य परीणामात् रसोत्पत्तिर्भविष्यति।
रसात् च शोणितं मांसं मांसाद् मेदोऽस्थिनी (ततः)॥ १२७॥

n Public domain. Digitization Muthulakshmi Research Academy

मलैर्वा दशभिः किट्टं भिन्नं देहाद् बहिर्व्रजेत्।
कर्णाक्षिनासिकाजिह्वादन्ताः शिश्नं गुदं नखाः॥ १२८॥

मलाश्रयाः कफस्वेदौ विण्मूत्रं द्वादश स्मृताः।
हृत्पद्मं प्रतिबद्धाश्च सर्वा नाड्यः समन्ततः॥ १२९॥

तासां मुखे तु तत्सूक्ष्मं प्राणः स्थापयते रसम्।
रसेन तेन ता नाडीः प्राणः पूरयते पुनः॥ १३०॥

पुनः प्रयान्ति संपूर्णाः ताश्च देहं समन्ततः।
ततः स नाडीमध्य(स्थः) शरीरेणोष्मणा पुनः॥ १३१॥

त्वक्तलावेष्टितं पूर्वं रुधिरं च प्रजायते।
रक्ताल्लोमानि मांसं च केशान् स्नायुश्च मांसतः॥ १३२॥

स्नायोः सिरास्ततोऽस्थीनि नखा मज्जास्थिसंभवाः।
मज्जात् करणवैकल्यं शुक्लं च प्रसवात्मकम्॥ १३३॥

इति द्वादशधा तस्य परिणामः प्रकीर्तितः।
शुक्लमन्नात् ततः शुक्लादस्य देहस्य संभवः॥ १३४॥

ऋतुकाले यथा शुक्लं निर्दोषं योनिसंस्थितम्।
तदा तद् वायुनाकृष्टं स्त्रीरक्तेनैकतां व्रजेत्॥ १३५॥

मधुराद् वर्धते शुक्लमम्लाद् मज्जा प्रवर्धते।
लवणाद् वर्धते चास्थि तिक्ताद् मेदः प्रवर्धते॥ १३६॥

Public domain. Digitization Muthulakshmi Research Acade

कटुकाद् वर्धते मांसं कषायाच्छोणितं रसात् ।
धातुक्रमात् प्रवेशे तु षड्रसं देहवर्धनम् ॥ १३७ ॥

मज्जा तां शुक्लतामेति दिवसे चाष्टमे नृणाम् ।
अग्निः सर्वात्मकं सर्वं जगत् स्थावरजङ्गमम् ॥ १३८ ॥

विसर्गकाले शुक्लस्य जीवः करणसंयुतः ।
प्रीत्या निविशते योनिं कर्मभिः स्वैर्नियोजितः ॥ १३९ ॥

तच्छुक्लं रक्तसंयुक्तमेकाहात् कललं भवेत् ।
पञ्चरात्रेण कललं बुद्बुदाकारतां व्रजेत् ॥ १४० ॥

बुद्बुदं सप्तरात्रेण मासे पेशी भवेत् पुनः ।
द्विसप्ताहात् भवेत् पेशी रक्तमांसस्थिता दृढा ॥ १४१ ॥

बीजस्येवाङ्कुराः पेश्यः पञ्चविंशति रात्रयः ।
भवन्ति मासमात्रेण पञ्चधा जायते पुनः ॥ १४२ ॥

ग्रीवा शिरश्च स्कन्धश्च पृष्ठवंशस्तथोदरम् ।
पाणिः पादं तथा पार्श्वकटिर्गात्रं तथैव च ॥ १४३ ॥

द्विमासाभ्यन्तरे सर्वे क्रमशः संभवन्ति हि ।
त्रिभिर्मासैः प्रजायन्ते सर्वाङ्गाङ्कुरसंधयः ॥ १४४ ॥

मासैश्चतुर्भिरङ्गुल्यः प्रजायन्ते यथाक्रमम् ।
मुखं नासा च कर्णौ च मासैर्जायन्ते पञ्चभिः ॥ १४५ ॥

n Public domain. Digitization Muthulakshmi Research Academy

दन्तपङ्क्तिस्तथा गुह्यं जायन्ते च नखाः पुनः ।
कर्णयोस्तु भवेच्छिद्रं षण्मासाभ्यन्तरेण तु ॥ १४६ ॥

पायुर्मेढ्रमुपस्थं च नाभिश्चाप्युपजायते ।
मासैश्च सप्तभिर्गात्रे जायन्ते ये च सन्धयः ॥ १४७ ॥

अङ्गप्रत्यङ्गसंपूर्णः शिरसा च समन्वितः ।
विभक्तावयवः स्पष्टः पुनर्मासाष्टकेन तु ॥ १४८ ॥

पञ्चात्मकसमायुक्तः परिपक्वः स तिष्ठति ।
एवमाहारवीर्येण षड्विधेन रसेन च ॥ १४९ ॥

नाभिसूत्रनिबद्धेन वर्धते स दिने दिने ।
ततः स्मृतिं लभेज्जीवः संपूर्णेऽस्मिन् शरीरके ॥ १५० ॥

सुखदुःखं विजानाति निद्रा स्वप्नं पुराकृतम् ।
मृतश्चाहं पुनर्जातो जातश्चाहं पुनर्मृतः । ॥ १५१ ॥

नानायोनिसहस्राणि मया दृष्टानि जानता ।
अधुना जातमात्रोऽहं प्राप्तसंस्कार एव च ॥ १५२ ॥

तत्तच्छ्रेयः करिष्यामि येन गर्भो न संभवेत् ।
गर्भस्थश्चिन्तयेदेवं महागर्भाद् विनिःसृतः ॥ १५३ ॥

अध्येष्यामि शिवज्ञानं संसारविनिवृत्तकम् ।
एवं स गर्भे दुःखेन महता परिपीडितः ॥ १५४ ॥

Public domain. Digitization Muthulakshmi Research Acader

जीवः कर्मवशादास्ते मोक्षोपायं विचिन्तयन्।
सत्त्वं प्रकाशकं भावं रजो रागात्मकं गुह ॥ १५५ ॥

तमो मोहात्मकं भावमुत्पादयति देहिनाम्।
सत्त्वात् संजायते ज्ञानं रजसो लोभ एव च ॥ १५६ ॥

तमसोऽसत्यमज्ञानं प्रमादालस्यमेव च।
सत्त्वात् सत्यं दया धैर्यं विनयं स्थैर्यमेव च ॥ १५७ ॥

रजसः क्रोधदम्भौ च निर्दयत्वं च जायते।
ऊर्ध्वं गच्छन्ति सत्त्वस्थाः मध्ये तिष्ठन्ति राजसाः ॥ १५८ ॥

जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः।
रजस्तमश्चाभिभूय सत्त्वं वर्धति षण्मुख ॥ १५९ ॥

रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा।
यमेव सेवते पुरुषो निःसङ्गात् सर्वदा गुणम् ॥ १६० ॥

अस्थिपट्टतुलास्तम्भं स्नायुबन्धेन यन्त्रितम्।
रक्तमांसमृदालिप्तं विण्मूत्रद्रवभाजनम् ॥ १६१ ॥

केशरोमतृणच्छन्नं रोगायत(न)मातुरम्।
वदनैकमहाद्वारं गवाक्षाष्टकभूषितम् ॥ १६२ ॥

ओष्ठद्वयकवाटं च दन्तजिह्वार्गलान्वितम्।
नाभिः स्वेदप्रवाहान्तं कफपित्तपरिप्लुतम् ॥ १६३ ॥

n Public domain. Digitization Muthulakshmi Research Academy

जराशोकसमाविष्टं कालचक्रानले स्थितम्।
कामक्रोधेन्धनाक्रान्तं व्यसनैश्चोपमर्दितम्॥ १६४॥

भोगतृष्णातुरं मूढं रागद्वेषवशानुगम्।
संवर्धिताङ्गप्रत्यङ्गं जरायुपरिवेष्टितम्॥ १६५॥

संकटेनाविविक्तेन योनिमार्गेण निर्गतम्।
विण्मूत्ररक्तसिक्ताङ्गं षाट्कौशिकसमुद्भवम्॥ १६६॥

अस्थिपञ्जरसंख्यानं ज्ञेयमस्मिन् कलेबरम्।
शतत्रयं षष्ठ्यधिकं पञ्चपेशीशतानि च॥ १६७॥

सार्धाभिस्तिसृभिश्छन्नं समन्ताद् रोमकोटिभिः।
शरीरं स्थूलसूक्ष्माभिर्दृश्यादृश्याभिसंस्थितम्॥ १६८॥

एतावतीभिर्नाडीनां कोटिभिस्तत्समन्वितम्।
प्रस्वेदमशुचिं याभिरन्तःस्थं स्रवते बहिः॥ १६९॥

द्वात्रिंशद्दशनाः प्रोक्ताः विंशतिश्च नखाः स्मृताः।
पित्तस्य कुडवं ज्ञेयं कफस्यार्धाढकं स्मृतम्॥ १७०॥

वसायाश्च पलं त्रिंशत् तदर्धं कललस्य च।
पञ्चार्बुदपला ज्ञेयाः पलानि दश मेदसः॥ १७१॥

पलत्रयं महारक्तं मज्जा स्यात् तच्चतुर्गुणम्।
अर्धं च कुडवं शुक्लं तद्वीर्यं प्राणिनां बलम्॥ १७२॥

Public domain. Digitization Muthulakshmi Research Academ

मांसस्य चैकपिण्डेन सहस्रपलमुच्यते।
रक्तं पलशतं ज्ञेयं विण्मूत्रं च प्रमाणतः॥
इति देहस्त्वभिहितो नित्यस्यानित्य आत्मनः॥ १७३॥

इति श्रीमत्सर्वज्ञानोत्तरागमे विद्यापादे
भूतात्मनिरूपणं
नाम तृतीयं प्रकरणम्

चतुर्थं प्रकरणम्

अन्तरात्मनिरूपणम्

योऽन्तरे वर्तते शब्दस्तस्य वाचः प्रवर्तते[१६]।
प्राणापानसमायोगात् सोऽन्तरात्मा प्रकीर्तितः॥ १७४॥

तस्माच्च सर्वशास्त्राणि संस्कृतप्राकृतानि च।
देशभाषादिभिर्नित्यं विधिवत् संप्रवर्तते॥ १७५॥

पशवश्च मृगाश्चैव पक्षिणश्च सरीसृपाः।
यावन्तः केचन वै सत्त्वा उच्चरन्ति सदा तु तत्॥ १७६॥

इति श्रीमत्सर्वज्ञानोत्तरागमे विद्यापादे
अन्तरात्मनिरूपणं
नाम चतुर्थं प्रकरणम्

n Public domain. Digitization Muthulakshmi Research Academy

पञ्चमं प्रकरणम्

तत्त्वात्मनिरूपणम्

सूक्ष्मा वै पञ्चतन्मात्राः मनोऽहंकारमेव च ।
बुद्धिरष्टगुणा ज्ञेया गुणाव्यक्तं च पौरुषम् ।। १७७ ।।

कला कालस्तथा माया विद्या विद्येश्वरं च यत् ।
सादाशिवं तथा तत्त्वं बैन्दवं शान्तमेव च ।। १७८ ।।

एतेषामेव संयोगात् तत्त्वात्मा पुरुषः स्मृतः ।
तत्त्वैरेतैर्जगत् कृत्स्नं पाशाश्चैते मलात्मकाः ।। १७९ ।।

सूक्ष्माः सर्वगता नित्याः सहजाः सर्वजन्तुषु ।
प्रकृतिश्चैव बोद्धव्या प्रक्रिया च निगद्यते ।। १८० ।।

न परं प्रक्रिया ज्ञानान्न शिवाद् व्यापकं परम् ।
नियोगात् परतः सिद्धिर्न शमात् परमं सुखम् ।। १८१ ।।

उदयो यस्य तत्त्वस्य देहे भवति षण्मुख ।
तदात्मकं सदा देही विकारमनुवर्तते ।। १८२ ।।

यस्मिंश्चरति भूतात्मा तत् तत्त्वं प्रविसर्पते ।
अभिभूय सर्वतत्त्वानि स च तन्मयतां व्रजेत् ।। १८३ ।।

मुहुर्मुहुः सदा देही सर्वतत्त्वैरनुक्रमात् ।
संचरन्त्यविभक्त्या तु व्यापकत्वं च सर्वतः ।। १८४ ।।

Public domain. Digitization Muthulakshmi Research Academ

तच्च तस्य सदा स्कन्द तत्त्वभावैः पृथग्विधैः।
लक्ष्यते व्यापकस्यापि उदयास्तमनस्थितिः॥ १८५॥

तथा तत्त्वाधिपान् भावान् प्रगृह्णाति षडानन।
सर्वधर्ममयो ह्यात्मा यथाकर्म प्रकल्पयेत्॥ १८६॥

यस्मिंस्थितो[१७] रतिं याति तमेव परिसेवते।
तस्मिंस्तत्त्वे स्मृतिं विद्यात् ततः कर्म समाचरेत्॥ १८७॥

तस्मादेवं विदित्वा तु शिवतत्त्वे निरामये।
निर्विकारे निराधारे रतिं कुर्याद् विचक्षणः॥ १८८॥

देही सर्वगतः सूक्ष्मः पुराणः शाश्वतो ध्रुवः।
व्यापकः सर्वतत्त्वानां मनोऽव्यक्तः सनातनः॥ १८९॥

अस्वतन्त्रो निबद्धश्च चिन्मात्रो मलदूषितः।
संमूढो नित्यसंसारी किंचिज्ञोऽनीश्वरोऽक्रियः॥ १९०॥

पशुधर्मोऽस्य संज्ञेयः शिवधर्मस्ततोऽन्यथा।
पशुधर्मादयं पुंसो ह्यनेकाकाररूपधृक्॥ १९१॥

आत्मा जन्तुः पुमान् देही पुरुषः पुद्गलस्तथा।
जीवः कपाली क्षेत्रज्ञः पर्याया एवमादयः॥ १९२॥

सर्वेषामेव जीवानां सर्वयुक्तः स्वकर्मभिः।
सर्वान् देहानवाप्नोति याति सर्वासु योनिषु॥ १९३॥

n Public domain. Digitization Muthulakshmi Research Academy

यावन्नोत्पद्यते ज्ञानं तावद् भ्रमति कर्मणा।
अज्ञानावृतदेहस्तु दुःखशोकपरिप्लुतः ॥ १९४ ॥

ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।
तस्मात्तु सर्वदुःखानां हानिरस्योपजायते ॥ १९५ ॥

इति श्रीमत्सर्वज्ञानोत्तरागमे विद्यापादे
तत्त्वनिरूपणं नाम
पञ्चमं प्रकरणम्

षष्ठं प्रकरणम्

मन्त्रात्मनिरूपणम्

ततः परं प्रवक्ष्यामि पुरुषं मन्त्रविग्रहम्।
सर्वशोकहरं दीप्तं सर्वपापहरं परम् ॥ १९६ ॥

सदेवासुरयक्षाणां किंनराप्सररक्षसाम्।
पितृमातृगणानां च सिद्धविद्याधरादिषु ॥ १९७ ॥

नागगन्धर्वतिर्यक्षु पिशाचानां नृणामपि।
शिवादौ सर्वतत्त्वानां मन्त्रा विन्दन्ति शाश्वताः ॥ १९८॥

नास्ति मन्त्रैर्विना किंचित् सर्वस्थावरजङ्गमम्।
यावन्तो ये च ते सत्त्वाः मन्त्राधिष्ठितविग्रहाः ॥ १९९ ॥

Public domain. Digitization Muthulakshmi Research Academ

यस्य यस्य हि मन्त्रस्य आदिमं तु यदक्षरम्।
षष्ठं त्रयोदशान्तं च तस्मिंस्तस्मिन् नियोजयेत्॥ २००॥

तं च मन्त्रं विजानीयात् सर्वतत्त्वात्मकं परम्।
बिन्दुनालंकृतं मूर्ध्नि सर्वकामफलप्रदम्॥ २०१॥

तेषामङ्गानि युञ्जीत ब्रह्मतत्त्वेषु कीर्तिताः।
दीर्घैर्भिन्ना स्मृता ह्यङ्गाः तेऽनुस्वारविवर्जिताः॥ २०२॥

सविसर्गः स्मृतो ह्यस्त्रः सोऽनुस्वारविवर्जितः।
इतरेषां तु बीजानां मूर्ध्नि बिन्दुं प्रदापयेत्॥ २०३॥

ओंकारदीपिता मन्त्राः नमस्कारान्तयोजिताः।
अर्चने संप्रयोक्तव्या होमे स्वाहान्तयोजिताः॥ २०४॥

आवाहनार्घ्यपात्रेषु स्थापनाचमनेषु च।
स्थापने मन्त्रविन्यासे धारणाध्यानकर्मसु॥ २०५॥

पूजाबलिविधानेषु जपहोमक्रियासु च।
शिवस्य यो विधिः प्रोक्तः सर्वकर्मक्रमेषु च॥ २०६॥

सर्वेषामेव तत्त्वानां तं विधिं परिकल्पयेत्।
अनुक्तं यद् भवेत् किंचित् तत्सर्वं हृदयेन तु॥ २०७॥

एवं विधिविधानज्ञो बुध्या कर्म समाचरेत्।
परमीकरणं प्रोक्तं सर्वतत्त्वेषु मन्त्रवित्॥ २०८॥

n Public domain. Digitization Muthulakshmi Research Academy

यस्यैव यो भवेन्मन्त्रो वाच्यवाचकभेदतः ।
स्थूलः सूक्ष्मः परः सो हि मन्त्रात्मा पुरुषः स्मृतः ॥ २०९ ॥

स्थूलं सूक्ष्मं परं ज्ञात्वा कर्म कुर्यात् यथेप्सितम् ।
स्थूलं शब्दमिति प्रोक्तं [२०] सूक्ष्मं चिन्तामयं भवेत् ॥ २१० ॥

चिन्तया रहितं यत्तु तत्सर्वं [२१]परिकीर्तितम् ।
स्थूलस्तु वाचिकां बुद्धिं सूक्ष्मो योगं च यच्छति
परश्च परनिर्वाणं यं प्राप्य न निवर्तते ॥ २११ ॥

यथा प्रदीपः प्रतिबुध्यमानो
भवत्यनेकः पुनरेक एव ।
तथाम्भसोऽनेकविधस्य लोके
जात्यन्तरं ह्येकमनेकरूपम् ॥ २१२ ॥

यमेव साधयेन्मन्त्रं तमात्मानं प्रकल्पयेत् ।
तदात्मका स्मृता ह्यङ्गा बहिरन्तर्विभागशः ॥ २१३ ॥

यस्य यादृग्विधं रूपं व्रतं तस्यैव तादृशम् ।
तादृशोऽप्युपचारं तु मन्त्रदेवत्वरूपतः [२२]॥ २१४ ॥

शास्त्रोपदिष्टमार्गेण यथारूपं प्रकल्पयेत् ।
तथारूपो भवेन्मन्त्रस्ततः कर्म प्रसाधयेत् ॥ २१५ ॥

Public domain. Digitization Muthulakshmi Research Academ

श्रोतुर्भावविभेदात् तु वर्णरूपं पृथग्विधम्।
सर्वोपाश्रयसंपन्नं स्फटिकोपलवद् यथा॥ २१६॥

इति श्रीमत्सर्वज्ञानोत्तरागमे विद्यापादे
मन्त्रात्मनिरूपणं
षष्ठं प्रकरणम्

सप्तमं प्रकरणम्

परमात्मनिरूपणम्

परात् परतरं वक्ष्ये मन्त्रातीतं निरामयम्।
निर्गुणं च निराधारं वर्णरूपविवर्जितम्॥ २१७॥

सर्वज्ञः सर्वगः शान्तः सर्वात्मा सर्वतोमुखः।
अतीन्द्रियो निरालम्बः सुसूक्ष्मः शाश्वतोऽव्ययः॥ २१८॥

निरौपम्योऽप्रमेयश्च परमात्मा प्रकीर्तितः।
यादृशेन तु भावेन पुरुषः समुपासते॥ २१९॥

एकधा बहुधा चैव तथैव प्रतिपद्यते।
यमेव चिन्तयेत् रूपं सर्वमात्मनि विद्यते॥ २२०॥

सर्वकामप्रदो ह्यात्मा प्रोक्तः षड्भेदविस्तरः।
भूतात्मा ह्यन्तरात्मा च तत्त्वात्मा जीवसंज्ञकः॥ २२१॥

n Public domain. Digitization Muthulakshmi Research Academy

मन्त्रात्मा परमाख्यश्चेत्येकोऽपि बहुधा स्थितः ।
भूतात्मा भूतसंयोगात् तत्त्वात्मा तत्त्वसंस्थितः ॥ २२२ ॥

मन्त्रात्मा मन्त्रयोगेन अन्तरात्मा गिरान्वितः ।
भोक्ता तु सुखदःखानां प्रकृतिस्थो गुणान्वितः ॥ २२३ ॥

जीवस्तु जीवनस्तेषामेभिर्मुक्तः परस्तु सः ।
सर्वरूपं यदैश्वर्यं नित्ययुक्तो ह्यवाप्नुयात् ॥ २२४ ॥

प्राप्तोऽपि स द्विधा भावी पुनर्भवमवाप्नुयात् ।
प्राग्यत्नेन परीक्षेण क्षयात् पापस्य कर्मणः ॥ २२५ ॥

तत्त्वविश्लेषकाले चाप्यद्वैतं प्रतिपद्यते ।
एक एव परो ह्यात्मा चित्तभेदादनेकधा ॥ २२६ ॥

एकस्यैव हि नामानि पृथग्भूतान्ययोगिभिः[२३] ।
अनामकस्य गीयन्ते भ्रान्तिज्ञानविमोहितैः ॥ २२७ ॥

यदाभिव्यज्यते ज्ञानं विमलं सर्वतोमुखम् ।
तदात्मीयं परं धर्मं विन्दते शाश्वतं ध्रुवम् ॥ २२८ ॥

अहमेव परो ह्यात्मा पुरुषः कारणं स्मृतः ।
अहमेव परो ब्रह्मा अहं ज्ञेयमनक्षरम् ॥ २२९ ॥

सर्वे विनाशका भावा मत्त एव पृथग्विधाः ।
भावाभावविनिर्मुक्त अहमेकः शिवोऽव्ययः ॥ २३० ॥

Public domain. Digitization Muthulakshmi Research Acader

योगसंन्यस्तकर्मा यो ज्ञानसंच्छिन्नसंशयः
निर्विकल्पः सदा नित्यमात्मानं पर्युपासयेत्॥ २३१॥

निरस्य वासनाः सर्वा आत्मतृप्तो निरामयः।
अद्वैतभावनायुक्तः सदात्मानमुपासयेत्॥ २३२॥

अप्राकृतेन नित्येन निर्मलेनाधिकारिणा।
व्यापकेनातिसूक्ष्मेण परेण ज्ञानचक्षुषा॥ २३३॥

विशुद्धं शाश्वतं नित्यमप्रमेयमनौपमम्।
निर्विकल्पमचिन्त्यं च हेतुदृष्टान्तवर्जितम्॥ २३४॥

सुतृप्तं निर्गुणं शान्तं तत्त्वातीतं निरञ्जनम्।
अविभाव्यमसंदेह्यं पश्यन्तीशानमात्मनि॥ २३५॥

सर्वदं सर्वदेहस्थं व्यापकं सर्वतोमुखम्।
निरामयं निराधारमात्मानं पश्यते[२४] शिवम्॥ २३६॥

विभिन्नं प्रक्रियामार्गं मन्त्रतन्त्रपरापरम्।
मूर्तामूर्तं जगत्कृत्स्नं पश्यत्यात्मन्युपस्थितम्॥ २३७॥

सर्वज्ञः सर्वदर्शी च परिपूर्णः सुनिर्मलः।
विमुक्तः केवलीभूतः सुखमक्षयमाप्नुयात्॥ २३८॥

एतत् ते शिवसद्भावं शिववक्त्राद् विनिर्गतम्।
गुह्याद् गुह्यतरं गुह्यं गोपनीयं प्रयत्नतः॥ २३९॥

n Public domain. Digitization Muthulakshmi Research Academy

नाशिष्याय प्रदातव्यं नाभक्ताय कदाचन।
एवं ज्ञानामृतं प्रोक्तं प्रकाश्यमपशोर्गुह ॥ २४० ॥

इति श्रीमत्सर्वज्ञानोत्तरागमे विद्यापादे
परमात्मनिरूपणं
नाम सप्तमं प्रकरणम्

Public domain. Digitization Muthulakshmi Research Academ

योगपादः

एकाकिनस्तु शान्तस्य यतचित्तविरागिणः।
युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ॥ २४१ ॥

युक्तस्वप्नावबोधस्य तत्त्वतः शृणु षण्मुख।
यो ध्याता यच्च तद् ध्यानं तद्वै ध्यानप्रयोजनम् ॥ २४२ ॥

सर्वाण्येतानि यो वेत्ति स योगं योक्तुमर्हति।
आत्मा ध्याता मनो ध्यानं ध्येयः सूक्ष्मो महेश्वरः ॥ २४३॥

यत् परात् परमैश्वर्यमेतद्ध्यानप्रयोजनम्।
मानापानौ समं भुक्त्वा सुखदुःखे समे तथा ॥ २४४ ॥

हर्षं भयं विषादं च संत्यज्य योगमभ्यसेत्।
शून्यागारे वने रम्ये देवतायतने शुभे ॥ २४५ ॥

नदीतीरे विविक्ते वा गृहे घोरवनेऽपि वा।
प्रच्छन्ने च विविक्ते च निःशब्दे जनवर्जिते ॥ २४६॥

गुणदोषविनिर्मुक्ते निर्विकल्पे निरातपे।
स्नात्वा शुचिरुपस्थाप्य प्रणम्य शिरसा शिवम् ॥ २४७ ॥

योगाचार्यं नमस्कृत्य योगं युञ्जीत मानवः।
पद्मकं स्वस्तिकं वापि उपस्थाप्याञ्जलिं तथा ॥ २४८ ॥

n Public domain. Digitization Muthulakshmi Research Academy

पीठार्थमर्धचन्द्रं वा सर्वतोभद्रमेव वा।
आसनं रुचिरं बध्वा ऊर्ध्वकायः समं शिरः॥ २४९॥

सर्वसङ्गान् परित्यज्य आत्मसंस्थं मनो गुह।
न दन्तैः संस्पृशेद् दन्तान् सृक्विर्णी च न जिह्वया॥ २५०॥

किंचिदञ्चितनेत्रस्थं शिवं सम्यक् तदोच्चरेत्।
संभावयति तत्त्वानि तन्मात्राद्यानि देहिनाम्॥ २५१॥

पुनर्विनाशयत्येव अस्त्रयुक्तः षडानन।
न पृथक् हृदयं तस्य न शिरो न शिखा गुह॥ २५२॥

वर्मास्त्रनेत्रसहितं तस्मादेव प्रवर्तते।
प्राणापानौ स (मे) कृत्वा सुषुम्नान्तरचारिणौ॥ २५३॥

तपोवृत्तिविशुद्धात्मा शिवं ध्यायेद् विचक्षणः।
अविनाभावसंयुक्तः ज्योतीरूपं सुनिर्मलम्॥ २५४॥

सुसूक्ष्मं व्यापकं नित्यं निर्विकल्पं सदा बुधः।
उत्तमा मध्यमाधमाः सगर्भास्त्रिविधा स्मृताः॥ २५५॥

प्राणायामांश्च तान् सर्वान् पूरककुम्भकरेचकान्।
प्राणायामैर्दहेद् दोषान् धारणाभिस्तु किल्बिषम्॥ २५६॥

प्रत्याहारेण संत्यज्य ध्यानेनानीश्वरान् गुणान्।
उदरं पूरयित्वा तु वायुना यावदीप्सितम्॥ २५७॥

Public domain. Digitization Muthulakshmi Research Acade

प्राणायामो भवेदेष पूरको देहपूरकः।
पिधाय सर्वद्वाराणि निःश्वासोच्छ्वासवर्जितः॥ २५८॥

संपूर्णकुम्भवत् तिष्ठेत् प्राणायामः सकुम्भकः।
ततोर्ध्वं रेचयेत् वायुं मृदुनिःश्वाससंयुतम्॥ २५९॥

रेचकस्त्वेष विख्यातः प्राणसंशयकारकः।
अभिव्यक्तानि जानीयात् स्वधर्मगुणलक्षणात्॥ २६०॥

विद्यां कलां ततः कालं मायां विद्यां ततः परम्।
दृष्ट्वा तु क्रमशः सर्वान् पुनरस्त्रेण भेदयेत्॥ २६१॥

विद्येश्वरं ततस्तत्त्वं तया सादाशिवं परम्।
हित्वाकृष्टानि चास्त्रेण ततः सूक्ष्मं शिवं विशेत्॥ २६२॥

अमृतात्मा शिवः साक्षात् तस्मिन् विष्टस्तु योगवित्।
सर्वज्ञः सर्वगः सूक्ष्मः सर्वेशः सर्वकृद् भवेत्॥ २६३॥

सर्वेष्वपि हि शास्त्रेषु ज्ञेयं वस्तुचतुष्टयम्।
पशुः पाशः पतिश्चैव शिवं चेति यथाक्रमम्॥ २६४॥

ज्ञात्वा तु तत्त्वसद्भावं तत्र सारं तु दुर्लभम्।
सर्वथा वर्तमानोऽपि गृह्णाति न पुनस्तनुम्॥ २६५॥

इति सर्वज्ञानोत्तरागमे योगपादः समाप्तः

n Public domain. Digitization Muthulakshmi Research Academy

पाठभेदाः

ग्र—पण्डितरामचन्द्रशर्मणां स्वीयग्रन्थलिपिमयी मातृका।

ग्र मु —ग्रन्थलिप्यां मुद्रिता त्रुटिता च मातृका।

१. मलरूषिता (ग्र)
२. अनीश्वरा (ग्र)
३. रसविद्ध (ग्र मु)
४. रसविद्ध (ग्र मु)
५. अथान्यम् (ग्र मु)
६. ज्ञानम् (ग्र)
७. अच्युतम् (ग्र)
८. प्रकाशते (ग्र)
९. शिवो नान्यः (ग्र)
१०. अद्वैतम् (ग्र)
११. ईक्षत इति पाठः साधुः
१२. मर्त्यानाम् (ग्र)
१३. तवात्मानम् (ग्र)
तमात्मानाम् (ग्र मु)
१४. अनौपम्यम् (ग्र)
१५. सर्वगो (ग्र)
१६. प्रवर्तकाः (ग्र)
१७. तत्त्वे (ग्र मु)
१८. तदा तु (ग्र मु)
१९. नृणामपि (ग्र)
२०. ज्ञेयम् (ग्र)
२१. तत्परम् (ग्र)
२२. रूपतः (ग्र)
२३. न्यनेकशः (ग्र मु)
२४. वीक्षित इति पाठः साधुः

Public domain. Digitization Muthulakshmi Research Acade

श्लोकार्धानुक्रमणिका

	श्लो.सं		श्लो.सं
अकर्तापीह पुरुषः	४०	अनादिनिधनाः पाशाः	४२
अकायो निर्गुणो ह्यात्मा	६३	अनामकस्य गीयन्ते	२२७
अग्निः सर्वात्मकं सर्वं	१३८	अनुक्तं यद् भवेत् किंचित्	२०७
अग्निप्रवेशनं नास्ति	१०७	अनेकाकारसंभिन्नं	५६
अग्नेरूर्ध्वं जलं स्थाप्य	१२४	अन्तःस्थमाशये पूर्वं	१२३
अग्राह्यस्यापि सूक्ष्मस्य	४८	अन्तर्लीनं तथा ज्ञेयम्	५
अङ्गप्रत्यङ्गसंपूर्णं	१४८	अन्योन्यरससंयोगात्	१२१
अचिन्त्यं चिन्तयेन्नित्यं	८५	अप्राकृतेन नित्येन	२३३
अज्ञानावृतदेहस्तु	१९४	अभावे भावमाश्रित्य	८३
अण्डजाः पक्षिणः सर्वे	११३	अभिभूय सर्वतत्त्वानि	१८३
अतः परं प्रवक्ष्यामि	४८	अभिव्यक्तानि जानीयात्	२६०
अतः परतरं नास्ति	१०९	अमृतात्मा शिवः साक्षात्	२६३
अतीन्द्रियो निरालम्बः	४६	अयसो हेमवर्णत्वात्	२०
अतीन्द्रियो निरालम्बः	२१८	अर्चने संप्रयोक्तव्यम्	२०४
अथवा बहुनोक्तेन	६६	अर्धं च कुडवं शुक्लं	१७२
अथातः संप्रवक्ष्यामि	४८	अलिङ्गमक्षरं शान्तं	५३
अद्वैतभावनायुक्तः	६०	अविज्ञातः पशुः सो हि	६३
अद्वैतभावनायुक्तः सदा	२३२	अविनाभावसंयुक्तः	२५४
अधुना जातमात्रोऽहं	१५२	अविभाव्यमसन्देह्यं	५४
अध्येष्यामि शिवज्ञानं	१५४	अविभाव्यमसन्देह्यं	२३५
अनन्तशक्तिश्च	१०४	अविष्वक् स्थाप्य चाहारं	१२३

In Public domain. Digitization Muthulakshmi Research Academy

अस्मात् परं नान्यदिहास्ति १०२
अस्थिपञ्जरसंस्थानं १६७
अस्थिपट्टतुलस्तम्भं १६१
अस्वतन्त्रो निबद्धश्च १९०
अहमात्मा शिवो ह्यन्यः ५८
अहमेव जगन्नाथः ५६
अहमेव परो ब्रह्मा २२९
अहमेव परो ह्यात्मा २२९
आ
आगन्तुका स्मृताः ह्येते ३५
आत्मन्येव स्थितः शान्तः ९३
आत्मलाभात् परो लाभः ७२
आत्मविज्ञानमाश्रित्य ७६
आत्मसंस्थं मनः कृत्वा ८३
आत्मा जन्तुः पुमान् देही १९२
आत्मा ध्याता मनो ध्यानं २४३
आत्मानं परमो भूत्वा ७१
आसनं रुचिरं बध्वा २४९
आद्याः पाशास्ततस्तेषां २
आभात्येवं परो ह्यात्मा ९७
आवाहनार्घ्यपात्रेषु २०५
आहारस्य परीणामात् १२७
इ
इतरेषां तु बीजानां २०३
इति केचित्तु मोहेन १३
इति देहस्त्वभिहितः १७३
इति द्वादशधा तस्य १३४
इति भेदाः षडन्नस्य १२२
इत्येवं केचिदिच्छन्ति ७
इत्येवमधिकारेण १०१
इत्येवमात्मनि ज्ञानं ६८
इन्द्रियाणि च भूतानि ३५
ईश्वरो व्यञ्जकस्तेषां ३८
उ
उच्छूनतां मृदुत्वं च ११६
उत्तमा मध्यमाधमाः २५५
उदयो यस्य तत्त्वस्य १८३
उदरं पूरयित्वा तु २५७
उद्भिदः स्थावराः ज्ञेयः ११२
ऊर्ध्वं गच्छन्ति सत्त्वस्थाः १५८
ऋतुकाले यदा शुक्लं १३५
ए
एक एव परो ह्यात्मा २२६
एकदेशेन चेत् सर्वे ९
एकदेशेन वा जीवः ८
एकदेशेन सर्वेषां ९
एकधा बहुधा चैव २२०
एकषष्ट्यादि बीजानि ११५

Public domain. Digitization Muthulakshmi Research Acade

एकस्यैव हि नामानि	२२७	कामक्रोधेन्धनाक्रान्तं	१६४
एकाकारस्य शून्यत्वात्	१०	किंचिदञ्चितनेत्रस्थं	२५१
एकाकिनस्तु शान्तस्य	२४१	कुरुते पाशविश्लेषं	२८
एता लूना मर्दिताश्च	११९	कृमिकीटपतङ्गाद्याः	११३
एतावतीभिर्नाडीनां	१६९	केचित् सामान्यमद्वैतं	२४
एतेषामेव संयोगात्	१६९	केनचित् साधनेनैव	७
एतत्ते शिवसद्भावं	२३९	केनचित् साधनेनैव	१३
एवम् आहारवीर्येण	१४९	के पाशाः को मलः	२
एवम् एकात्मभावेन	६१	केशलोमतृणच्छन्नं	१६२
एवं ज्ञानामृतं प्रोक्तं	२४०	क्षीरवत् पश्यतां ज्ञानं	८९
एवं योपासयेन्मोहात्	५९	ग	
एवं विधिविधानज्ञः	२०८	गच्छंस्तिष्ठन् स्वपन्	९२
एवं स गर्भे दुःखेन	१५४	गर्भस्थश्चिन्तयेदेवं	१५३
ओंकारदीपिता मन्त्राः	२०४	गवामनेकवर्णानां	८९
ओषध्यः फलपाकान्ताः	११९	गुणदोषविनिर्मुक्ते	२४७
ओष्ठद्वयं कवाटं च	१६३	गुणभूताः स्मृताः पाशाः	३१
क		गुरुं परं परायत्तं	४९
कटुकाद् वर्धते मांसं	१३७	गुह्याद् गुह्यतरं गुह्यं	२३९
कर्णयोस्तु भवेच्छिद्रं	१४६	ग्रीवा शिरश्च स्कन्धश्च	१४३
कर्णाक्षिनासिका जिह्वा	१२८	घटसंवृत आकाशः	९९
कर्मणा तु शरीराणि	३७	घटो नीयते नाकाशः	९९
कर्मणोऽप्यतिमिश्रेण	१११	च	
कर्मोदयाद् भवेत् सृष्टिः	३८	चिन्तया रहितं यत्तु	२११
कला कालस्तथा माया	१७८	छिन्ने कुम्भे यथाकाशः	१००

n Public domain. Digitization Muthulakshmi Research Academy

जघन्यगुणवृत्तिस्थाः	१५९	तत्र सिक्ता जलैर्भूमिं	११४
जरायुजाश्च विज्ञेयाः	११४	तत् सद् भवत्यसन्देहात्	६८
जराशोकसमाविष्टं	१६४	तत्सुखं परमं प्रोक्तं	८६
जलस्याधः स्वयं प्राणः	१२५	तथाचार्यो दहेत् पुंसां	३०
जीवः कपाली क्षेत्रज्ञः	१९२	तथा जीवस्य दुःखादि	१२
जीवः कर्मवशादास्ते	१५५	तथा तत्त्वाधिपान् भावान्	१८६
जीवत्वं च तथास्यापि	१७	तथात्मभावनायुक्तः	९८
जीवस्तु जीवनस्तेषां	२२४	तथात्मा ज्ञानसंबन्धात्	६
ज्ञात्वा तु तत्त्वसद्भावं	२६५	तथात्मा पाशसंश्लिष्टो	२७
ज्ञात्वात्मानमिदं सर्वं	६९	तथात्मीयं परं धर्मं	२२८
ज्ञानं लब्ध्वा परां शान्तिं	१९५	तथा बन्धमवाप्नोति	४१
त		तथाम्भसोऽनेकविधस्य	२१२
तं च मन्त्रं विजानीयात्	२०१	तथा रूपो भवेन्मन्त्रः	२१५
तच्च तस्य सदा स्कन्दः	१८५	तथा हि सर्वपाशानां	२९
तच्छुक्लं रक्तसंयुक्तं	१४०	तथैव रसवीर्येण	१९
तच्छेदकस्तथानादिः	४२	तदन्नं पिण्डकबलैः	१२२
तण्डुलाश्च यथा पक्वाः	११८	तदन्नमुष्णतोयेन	१२६
ततः परं प्रवक्ष्यामि	१९६	तदागमान् संपरित्यज्य	१०२
ततः स नाडी मध्यस्थः	१३१	तदा तद् वायुनाकृष्टं	१३५
ततः स्मृतिं लभेज्जीवः	१५०	तदात्मकं सदा देही	१८२
ततमेतैर्जगत्कृत्स्नं	३४	तदात्मकं स्मृता ह्यङ्गाः	२९३
ततोर्ध्वं रेचयेत् वायुं	२५९	तदात्मानमुपासीत	७३
तत्त्वविश्लेषकाले च	२२६	तदात्मीयं परं धर्मं	२२८
तत्त्वैरेतैर्जगत्कृत्स्नं	१७९	तदूर्ध्वं रेचयेद् वायुं	२५९

Public domain. Digitization Muthulakshmi Research Academ

तद्भूतपरिणामेन ११२
तन्न तत्प्रतिपन्नं १४
तन्मात्राद्यास्तु ये तत्त्वाः ३३
तन्मूलादङ्कुरोत्पत्तिः ११६
तपोवृत्तिविशुद्धात्मा २५४
तमसोऽसत्यमज्ञानं १५७
तमो मोहात्मकं भावं १५६
तस्माच्च सर्वशास्त्राणि १७५
तस्माज्जीवः स्वतः साक्षात् ११
तस्मात्तु सर्वदुःखानां १९५
तस्मादात्मा सदा वेद्यः ६४
तस्मादेवं विदित्वा तु १८८
तस्मात् ब्रह्मणि संस्थाप्य ९०
तस्मिंस्तत्त्वे स्मृतिं विद्यात् १८७
तादृशोऽप्युपचारं तु २१४
ताम्रस्यैव तु हेमत्वं ५
तासां मुखे तु तत्सूक्ष्मं १३०
तिर्यगूर्ध्वमधश्चैव ७५
ते तु पाशाः पराः प्रोक्ताः ३३
ते तु सांसर्गिकाः पाशाः ३६
तेषामङ्गानि युञ्जीत २०२
त्रिभिर्मासैः प्रजायन्ते १४४
त्रिविधास्ते स्मृताः पाशाः ३२
त्वक्तलावेष्टितं पूर्वं १३२
दन्तपङ्क्तिस्तथा गुह्यं १४६
दह्यते धाम्यमानानां ३०
दीर्घैर्भिन्नास्तथा ह्यङ्गाः २०२
दृष्ट्वा तु क्रमशः सर्वान् २६१
देशभाषादिभिर्नित्यं १७४
देही सर्वगतः सूक्ष्मः १८९
द्वात्रिंशद् दशनाः प्रोक्ताः १७०
द्विधा भवति तत् पक्वं १२६
द्विमासाभ्यन्तरे सर्वे १४४
द्विसप्ताहाद् भवेत् पेशी १४१
द्वैतमेवास्ति सर्वत्र २५
धर्माधर्मफलं नास्ति १०६
धातुक्रमात् प्रवेशे तु १३७
न
न चैव प्राकृतैर्दोषैः ९६
न चैवाभ्यन्तरे बाह्ये ७४
न जपो नार्चना ध्यानं १०५
न तत्र देवानुद्दिश्य ६९
न ते मनुष्याः कीटश्च २६
न दन्तैः संस्पृशेद् दन्तान् २५०
न दीक्षा न तु संस्कारः १०५
नदीतीरे विविक्ते वा २४६
न परं प्रक्रिया ज्ञानात् १८१
न पृथग् हृदयं तस्य २५२

n Public domain. Digitization Muthulakshmi Research Academy

न प्राणो नैव चापानः ७३
न भूतो न भविष्यामि ९४
न लिङ्गं नाश्रमाचारः ९१
नष्टवत् प्रतिबद्धत्वं १६
नष्टवत् प्रतिबद्धत्वं १७
नष्टवत् प्रतिबद्धत्वं १८
नागगन्धर्वतिर्यक्षु १९८
नागतोऽहंगतो वापि ९४
नानायोनिसहस्राणि १५२
नान्यः शरणतः कश्चित् ७१
नाभिसूत्रनिबद्धेन १५०
नाभिस्वेदप्रवाहान्तं १६३
नाशिष्याय प्रदातव्यं २४०
नास्ति मन्त्रैर्विना कश्चित् १९९
नाहं किंचित् करोमीति ९५
नियमादि न तस्यास्ति १०६
नियोगात् परतः सिद्धिः १०६
निरञ्जनं गुणातीतं ७८
निरस्य वासनाः सर्वा २३२
निरस्य विषयासक्तिं ७९
निरामयो निराधारो ४५
निरामयं निराधारं २३६
निरामयं निराधारं ७८
निराश्रयं निरालम्बं ७९
निरौपम्योऽप्रमेयश्च २१९
निर्गुणं च निराधारं ७८
निर्गुणं च निराधारं १७
निर्गुणं च निराधारं २१७
निर्नाश्य तमसो रूपं २३४
निर्विकल्पमचिन्त्यं च ८६
निर्विकल्पमचिन्त्यं च २३४
निर्विकल्पमनिर्देश्यं ५३
निर्विकल्पः सदा नित्यः २३१
निर्विकारे निराधारे १८८
निस्तत्त्वे निष्कलीभूते ८५
नैव चिन्त्यं न चाचिन्त्यं ८४
नैव तस्य कृतेनार्थो ९१
नैव प्रकृतिसंबद्धो ९६
नैव शून्यं न चाशून्यं ७७
प
पक्षपातविनिर्मुक्तं ७७
पक्षपातविनिर्मुक्तं ८४
पञ्चरात्रेण कललं १४०
पञ्चात्मकसमायुक्तः १४९
पञ्चार्बुदमला ज्ञेयः १७१
पतिः सदाशिवो ज्ञेयः ४३
पतिश्च किंविधो ज्ञेयः ३
पतिरेवं समाख्यातः ४४

Public domain. Digitization Muthulakshmi Research Acader

पद्मकं स्वस्तिकं वापि	२४९	पुनर्विनाशयत्येव	२५२
पयसा वेष्टितं तोयं	१८	पूजाबलिविधानेषु	२०६
परः परमनिर्वाणो	६५	पूर्वोपार्जितकृत्यानां	३७
परश्च परनिर्वाणं	२११	प्रकाशो वा तथास्यापि	१५
परमाद्वैतविज्ञानं	२३	प्रकृतिश्चैव बोद्धव्या	१८०
परमीकरणं प्रोक्तं	२०८	प्रच्छन्ने च विविक्ते च	२४६
परात् परतरं वक्ष्ये	२१७	प्रत्याहारेण संत्यज्य	२५७
परापरविभागेन	६५	प्रद्वेषो जायते सम्यक्	२३
पर्णान्नालं ततः काण्डं	११७	प्रवृत्तिश्च निवृत्तिश्च	१०७
पलत्रयं महारक्तं	१७२	प्रसवाच्च तुषः क्षीरं	११७
पशवश्च मृगाश्चैव	१७६	प्रस्वेदमशुचिं याभिः	१६९
पशुधर्मादयं पुंसो	१९१	प्राकृतानि च कर्माणि	९५
पशुधर्मोऽस्य संज्ञेयः	१९१	प्राग् यत्नेन परोक्षेण	२२५
पशुः पाशः पतिश्चैव	२६४	प्रागपानसमायोगात्	१७४
पशुपाशविधानं हि	१	प्राणापानौ समे कृत्वा	२५३
पशुरात्मा स्वतन्त्रश्च	४	प्राणायामांश्च तान् सर्वान्	२५६
पाणिः पादं तथा पार्श्वं	१४३	प्राणायामैर्दहेद् दोषान्	२५६
पायुमेढ्रमुपस्थं च	१४७	प्राणायामो भवेदेष	२५८
पिता पुत्रापराधेन	४०	प्राप्तोऽपि स द्विधा भावी	२२५
पितृमातृगणानां च	१९७	प्रीत्या निविशते योनिं	१३९
पित्तस्य कुडुवं ज्ञेयं	१७०	ब	
पिधाय सर्वद्वाराणि	२५८	बन्धमाप्नोति पुरुषः	३९
पीठार्थमर्धचन्द्रं वा	२४९	बहिरन्तर्विभागेन	४७
पुनः प्रयान्ति संपूर्णाः	१३१	बहिरन्तर्विभागेन	५८

n Public domain. Digitization Muthulakshmi Research Academy

बिन्दुनालंकृतं मूर्ध्नि २०१
बीजस्येवाङ्कुराः पेश्यः १४२
बुद्धिरष्टगुणा ज्ञेयः १७७
बुद्बुदं सप्तरात्रेण १४१

भ

भक्ष्यं भोज्यं च पेयं च १२१
भवदारिद्र्ययोगेषु ९३
भवन्ति मासमात्रेण १४२
भवप्रसादतो लभ्यं २४
भवबन्धविमोक्षार्थं ५०
भावयेदात्मनात्मानं ८०
भावानेतान् परित्यज्य ८१
भावाभावविनिर्मुक्तः २३०
भूतात्मा भूतसंयोगात् २२२
भूतात्मा ह्यन्तरात्मा च २२१
भेदे सति भवेद्दैक्यं २६
भोक्ता तु सुखदुःखानां २२३
भोगतृष्णातुरं मूढं १६५

म

मज्जातां शुक्लतामेति १३८
मज्जात् करणवैकल्यं १३३
मणिमन्त्रौषधादीनां १५
मधुराद् वर्धते शुक्लं १३६
मन्त्रात्मा परमाख्यश्च २२२
मन्त्रात्मा मन्त्रयोगेन २२३
मन्त्रोऽयं देवता ह्येषा ८२
मन्त्रौषधर्बलैर्यद्वत् २९
मया व्याप्तमिदं सर्वं ५५
मलाश्रयाः कफस्वेदौ १२९
मलैर्वा दशभिः किट्टं १२८
महापापवतां नृणां २२
मांसस्य चैकपिण्डेन १७३
मानापानौ समं भुक्त्वा २४४
मासैश्चतुर्भिरङ्गुल्यः १४५
मासैश्च सप्तभिर्गात्रे १४७
मुखं नासा च कर्णौ १४५
मुहुर्मुहुः सदा देहे १८४
मूर्तामूर्तं जगत् कृत्स्नं २३७
मृतश्चाहं पुनर्जातो १५१

य

यः शिवः सोऽहमेवेति ६०
यच्च किंचित् जगत्यस्मिन् ५७
यत् परात् परमैश्वर्यं २४४
यथा ज्ञात्वा विभागेन २७
यथा ताम्रमलो नैव १६
यथा प्रदीपः प्रतिबुध्यमानो २१२
यथाभिव्यज्यते ज्ञानं २२८
यथा भेषजसंपर्कात् ११

Public domain. Digitization Muthulakshmi Research Academ

यथा स्वाभाविकं वह्नेः १४
यथैवासाधुसंयोगात् ४१
यदाभिव्यज्यते ज्ञानं २२८
यदा यात्यात्मनीभावो ८७
यदेव निष्कलं रूपं ५२
यमेव चिन्तयेत् रूपं २२०
यमेव साधयेत् मन्त्रं २१३
यमेव सेवते पुरुषो १६०
यवाद्याः शालिपर्यन्ताः ११८
यस्मात् सर्वगतं ब्रह्म ९०
यस्मिंश्चरति भूतात्मा १८३
यस्मिंस्थितो रतिं याति १८७
यस्य यस्य हि मन्त्रस्य २००
यस्यैव यो भवेन्मन्त्रो २०९
यस्य यादृग्विधं रूपं २१४
यादृशेन तु भावेन २१९
यावन्तो ये च ते सत्त्वाः १९९
यावन्तः केचन वै सत्त्वाः १७६
यावन्नोत्पद्यते ज्ञानं २९४
युक्तस्वप्नावबोधस्य २४२
युक्ताहारविहारस्य २४१
येन विज्ञायते सम्यक् ४९
योऽन्तरे वर्तते शब्दः १७४
योऽसौ सर्वगतो देवः ५०
योऽसौ सर्वेषु शास्त्रेषु ६२
योगसंन्यस्तकर्मा यः २३१
योगाचार्यं नमस्कृत्य २४८
यो ध्याता यच्च तद् ध्यानं २४२

र

रक्तं पलशतं ज्ञेयं १७३
रक्तमांसमृदालिप्तं १६१
रक्ताल्लोमानि मांसं च १३२
रजस्तमश्चाभिभूय १५९
रजः सत्त्वं तमश्चैव १६०
रजसः क्रोधदम्भौ च १५८
रसवीर्यविनाशे तु २०
रससिक्तं यथा ताम्रं ६
रससिक्तमयः स्वर्णं १२
रसात् च शोणितं १२७
रसेन तेन ता नाडीः १३०
राजतं काञ्चनग्रस्तं १९
रेचकस्त्वेष विख्यातः २६०
लक्ष्यते व्यापकस्यापि १८५
लवणाद् वर्धते चास्थि १३६

व

वदनैकमहाद्वारं १६२
वर्मास्त्रनेत्रसहितं २५३
वसायाश्च पलं त्रिंशत् १७१

n Public domain. Digitization Muthulakshmi Research Academy

वाग्विकल्पविशेषेण	६७	शतत्रयं षष्टयधिकं	१६७
वायुना धाम्यमानो	१२५	शरीरं स्थूलसूक्ष्माभिः	१६८
वार्तामात्रमिदं प्रोक्तं	८	शास्त्रोपदिष्टमार्गेण	२१५
वायुना व्यूह्यमाना खे	११५	शिव एव स्वतः साक्षात्	२२
विज्ञातः शाश्वतः शुद्धः	६४	शिवज्ञानामृतं पीत्वा	१०८
विज्ञानमेवं समुपास्य	१०३	शिववच्छाश्वतः सिद्धिः	१०८
विण्मूत्ररक्तसिक्ताङ्गं	१६६	शिवश्च कीदृशः प्रोक्तः	३
विद्यां कलां ततः कालं	२६१	शिवस्य यो विधिः प्रोक्तः	२०६
विद्येश्वरं ततस्तत्वं	२६२	शिवादौ सर्वतत्त्वानां	१९८
विनाशोत्पत्तिरेवास्य	१११	शिवाद्यवनिपर्यन्तं	५७
विनाश्य तमसो रूपं	९७	शिवोऽन्यस्त्वहमेवान्यः	५९
विभक्तावयवाः स्पष्टाः	१४८	शिवो यस्तु परस्तस्मात्	४५
विभिन्नं प्रक्रियामार्गं	२३७	शुक्लमन्नात् ततः शुक्लात्	१३४
विभिन्ने प्राकृते देहे	१००	शून्यागारे वने रम्ये	२४५
विमलयति सर्वभावान्	११०	शूर्पोलूखलयन्त्राद्यौ	१२०
विमुक्तः केवलीभूतः	२३८	श्रोतुर्भावविभेदात्तु	२१६
विशुद्धं शाश्वतं नित्यं	२३४	षड्विधाहारभेदेन	१२०
विशेषाद्वैतमाश्रित्य	२५	षष्ठं त्रयोदशान्तं च	२००
विषयासक्तिदोषेण	३९	स	
विषापहारं कुरुते	२८	संकटेनाविविक्तेन	१६६
विसर्गकाले शुक्लस्य	१३९	संचरन्त्यविभक्त्या तु	१८४
व्यापकः सर्वतत्त्वानां	१८९	संन्यस्य सर्वकर्माणि	८०
व्यापकेनातिसूक्ष्मेण	२३३	संपूर्णकुम्भवत् तिष्ठेत्	२५९
श		संप्रविश्यान्नमध्ये तु	१२४

Public domain. Digitization Muthulakshmi Research Academ

संभावयति तत्त्वानि २५१
संमूढो नित्यसंसारी ४
संमूढो नित्यसंसारी १९०
संयोगं च तथा तेषां १
संवर्धिताङ्गप्रत्यङ्गं १६५
संसर्गाद् यद् भवेत् कर्म ३६
संसारार्णवमग्नानां ७०
स एव भगवान् व्यापी ४७
सत्त्वं प्रकाशकं भावं १५५
सत्त्वात् संजायते ज्ञानं १५६
सत्त्वात् सत्यं दया धैर्यं १५७
सदेवासुरयक्षाणां १९७
स मुच्यते त्वयत्नेन ७२
सर्वं विमलं पश्यति ११०
सर्वंकामप्रदो ह्यात्मा २२१
सर्वगं सर्वदेहस्थं ६१
सर्वज्ञं तु तदात्मानं ७४
सर्वज्ञः सर्वगः शान्तः २१८
सर्वज्ञः सर्वगः शान्तः ४६
सर्वज्ञः सर्वगः शान्तः २१८
सर्वज्ञः सर्वगः सूक्ष्मः २६३
सर्वज्ञः सर्वदर्शी च २३८
सर्वज्ञता तृप्तिरनादिबोधः १०४
सर्वज्ञत्वं प्रवर्तेत ६२
सर्वतत्त्वमयोऽचिन्त्यः ५१
सर्वतत्त्वव्यतीतश्च ५१
सर्वथा वर्तमानोऽपि २६५
सर्वदं सर्वदेहस्थं २३६
सर्वदा सर्वकार्येषु ९२
सर्वदिग्देशकालेषु ८८
सर्वधर्ममयो ह्यात्मा १८६
सर्वबन्धाद् विनिर्मुक्तः १०१
सर्वभावान् परित्यज्य ८२
सर्वमन्त्रव्यतीतश्च ५५
सर्वमन्त्राधिपश्चासौ ४३
सर्वरूपं यदैश्वर्यं २२५
सर्ववर्णाश्रमाणां च ८८
सर्वसङ्गान् परित्यज्य २५०
सर्वशून्यं न चाशून्यं ७६
सर्वशून्यं तमाभासं ७६
सर्वशोकहरं दीप्तं १९६
सर्वाण्येतानि यो वेत्ति २४३
सर्वात्मना चेत् साम्येन १०
सर्वान् देहानवाप्नोति १९
सर्वान् देहानवाप्नोति १९३
सर्वे धर्मात्मनः सन्ति ६७
सर्वे विनाशका भावाः २३०
सर्वेषामेव जीवानां १९३

In Public domain. Digitization Muthulakshmi Research Academy

सर्वेषामेव तत्त्वानां	२०७	सोहमेव परो देवः	५४
सर्वेष्वपि हि शास्त्रेषु	२६४	स्थापने मन्त्रविन्यासः	२०५
सर्वोपाश्रयसंपन्नं	२१६	स्थूलं शब्दमिति प्रोक्तं	२१०
सविसर्गः स्मृतो ह्यस्त्रः	२०३	स्थूलं सूक्ष्मं परं	२१०
स सर्वगामी भवतीह	१०३	स्थूलः सूक्ष्मः परः	२०९
सहजौ सर्वभूतानां	३१	स्थूलः सूक्ष्मो विमिश्रश्च	४४
सांसर्गिकास्तथा भूयः	३२	स्थूलो मन्त्रमयः प्रोक्तः	६६
सादाशिवं तथा तत्त्वं	१७८	स्नात्वा शुचिरुपस्थाप्य	२४७
साधनेन विना जीवो	२१	स्नायोः सिरास्ततोऽस्थीनि	१३३
सार्धाभिस्तिृभिश्छन्नं	१६८	स्नेहक्षयात् यथा दीपो	९८
सुखदुःखं विजानाति	१५१	स्वतोऽशिवः शिवः	२१
सुतृप्तं निर्गुणं शान्तं	२३५	स्वदेशजातिसंबन्धान्	८१
सुनिष्कले परे स्थाने	७५	स्वभावविमलं नित्यं	७९
सुसूक्ष्मं व्यापकं नित्यं	२५५	ह	
सूक्ष्मगाः सर्वगो नित्याः	३४	हर्षं भयं विषादं च	२४५
सूक्ष्मा वै पञ्चतन्मात्राः	१७७	हित्वाकृष्टानि चास्त्रस्य	२६२
सूक्ष्मा सर्वगतो नित्याः	१८०	हृद्पद्मं प्रतिबद्धाश्च	१२९
सोऽहमेवमुपासीत	५२		